139
13

अथ

दिनकरभट्टकृतः

शान्तिसारः

Shanti Saar

विषयः-प्रयोगः

समयः १५६८ शाके A.D.

२ रस्मादिनि शाप्यं द्विजातस्य तन्त्राधिकारिणा वषट्कर्तव्या॥ किंच
शूद्रस्य समंत्रक एव तुलाद्यधिकारो रथकारवत्॥ अतः एव मा
धवेन दक्षिणार्धं तु यो विप्रः शूद्रस्य जुहुयात् हविः॥ ब्राह्मणस्तु भ
वेत् शूद्रः॥ शूद्रस्तु ब्राह्मणो भवेदिति पराशरवाक्य पत्राविप्रः शूद्र
दक्षिणा प्रार्थ्य यदीयं हविः शान्ति पुष्ट्याद्यर्थं वैदिके मंत्रैर्जुहोति॥ त
त्र ब्राह्मणस्यैव दोषः शूद्रस्य होमफलं भवतीत्येति व्याख्याते तादृशे
होत्र मखमूला पुमति शास्त्र ज्ञात्वा दोषः शूद्रस्याधिकार॥ अतएव
व मोक्षधर्मे शूद्रं प्रकृत्यैमत्र वर्जं न दुष्यन्ति कुर्वाणा पौष्टिकीं क्रि
यामिस्कच्च॥ कुमारिचश्रुभं पतिमिति वृक्षहोमः॥ अथ ग्रहपूजना
मदिविधिः॥ ॥ मात्स्ये॥ वैशंपायन मासीनमपृच्छौनक
पुरा॥ सर्वकामाप्तये नित्यकथं शांतिकपौष्टिकं शांतिमनिष्टना
शकं॥ पौष्टिकमैहिकफलजनावेशं॥ श्रीकामः शान्ति कामो वा ग्रह
यज्ञं समारभेत्॥ वृष्ट्यायु पुष्टि कामो वा तथैवाभिचरन्पुनः॥ ग्रहशां २

ति प्रवक्ष्यामि पुराणश्रुतिचोदितां॥ पुण्येह्नि विप्रकथिते कृत्वा ब्राह्म
णवाचनं॥ ग्रहान्ग्रहाधिदेवांश्च स्थाप्य होमं समाचरेत्॥ ग्रहयज्ञ
स्त्रयः प्रोक्ताः पुराणश्रुतिकोविदैः॥ प्रथमो युतहोमः स्यात तस्य ताव
द्विधिं वक्ष्ये पुराणश्रुतिभाषितं॥ गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्त
तां॥ वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयसंयुतां॥ संस्थापनाय देवानां च
तुरस्रामुदक्प्लवां॥ स्कांदे तु तस्याश्चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं
त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रयसंमितमिति वेदिः॥ त्रिमेखलं लघुकं
अग्निप्रणयनं कृत्वा तस्यामावाहयेत्सुरान्॥ देवतानां ततः स्थाप्य
न्नि विंशतिर्द्वादशाधिका॥ सूर्यः सोमस्तथा भौमो बुधजीवसितार्क
जाः॥ राहुकेतु इति प्रोक्ता ग्रहा लोकहितावहाः॥ संस्मरेद्रक्तमादि
मंगारकसमन्वितं॥ सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिंगलौ॥ म
दराहु तथा कृष्णौ धूम्रा केतुगणा विदुः॥ ग्रहवर्णानि देयानि वासां
सि कुसुमानि च॥ धूपामोदोत्र सुरभिरुपरिष्टाद्वितानकं॥ शोभनं स्था
पयेत्तासु फलपुष्पसमन्वितं॥ गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं

८ अगारकाय संपावं बुधाय क्षीरप्राशिकं ॥ लोहिताय हविष्यान्नमिति स्कं
देपाठः दध्योदनं तु जीवाय शुक्राय च घृतौदनं ॥ शनैश्चराय कृशरमा
जमांसं वराहवे ॥ चित्रौदनं च केतुभ्यः सर्वैर्भक्ष्यैरथार्चयेत् ॥ स्कांदे तु ॥
मिश्रितं तिलमाषैश्च नवेद्यं तु शनैश्चरे ॥ राहोर्मांसौदनं देयं केतोश्चित्रौ
दनं तथेति पाठः ॥ आग्नेय्युत्तरेण तस्माच्चतुरस्रं तद्विभूषितं ॥ चूतपल्ल
वसंछिन्नं फलवस्त्रयुगान्वितं ॥ पंचरत्नसमायुक्तं पंचभंगसमन्वितं ॥
स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत् ॥ गंगाद्याः सरितः सर्वाः समु
द्राश्च सरांसि च ॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् ॥ मृदमा
नीय विप्रेंद्र सर्वौषधिसमन्वितां ॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य ध
र्मवित् ॥ सर्वे समुद्राः सरितः सरांसि जलदा नदाः ॥ आयांतु यजमान
स्य दुरितक्षयकारकाः ॥ एवमावाहयित्वा तान् नमरान्मुनिसत्तम ॥ हो
मं समारभेत्सर्पिर्यवव्रीहितिलादिना ॥ अर्कः पलाशखदिरस्त्वपामार्गोथ
पिप्पलः ॥ उदुंबरः शमी दूर्वा कुशाश्च समिधस्त्विमाः ॥ एकैकस्याष्टशत
मष्टाविंशतिवा पुनः ॥ होतव्या मधुसर्पिर्भ्यां दध्याचैवसमन्विताः प्राद ८

पारिजाते आश्वलायनेनोक्तं ॥ एकस्तु बहुकुंडेषु कुर्यान्नाग्नौ मरव
गुरुः ॥ बहुष्वेकः स्रुचैकस्मिन्नग्नौ वा तद्विधानवित् ॥ एककुंडे तु नवभिर्नैव
होमप्रकल्पनं ॥ इत्युक्तं वचनवाचार्यपक्षे ज्ञेयः ॥ अत्र शूद्राणामप्यधिकारः

धर्मेप्सवस्तु धर्मज्ञाः सतां धर्ममनुष्ठिताः ॥ मंत्रवर्जं न दुष्यंति प्रशंसां प्रा

प्नुवंति चेति शूद्रधर्मप्रकरणे मनूक्तेः ॥ यद्यपि इमे धातिथि व्याचख्यौ मंत्र
रहितो यो ब्राह्मणादिना तुपवासादि धर्म उक्तस्तं मनुतिष्ठंतः शूद्रा न
दुष्यंति न पुनः संमंत्रकाण्यपि मंत्रवर्जमनुतिष्ठंतो न दुष्यंतीति ॥ त
द्युक्तं वाक्यवैयर्थ्यापत्तेः ॥ नव समंत्रककर्मविधीनां शूद्रान्प्रत्यप्रव
त्तेः कर्मणि मंत्रवर्जनविधानमशक्यमिति वाच्यं मंत्ररहितस्य विशिष्टकर्मवि
धौ बाधकाभावात् ॥ तथा च ब्राह्मणादिकर्तृकाधानवच्छूद्रकर्मभेदः यद्वा
अमंत्राभावः सर्वकर्मांगत्वेन विधीयते स च प्रकरणाच्छूद्रविषयः ॥ ननु
यत्र तुलातडागोत्सर्गादौ वर्णानामपि वर्णानां शूद्रेणापि प्रवर्त्यमित्या
दिवचनाच्छूद्राधिकारस्तत्रैवमप्रवर्जनविधानमस्तीति चेत् ॥ न स
कौ चेत्प्रमाणाभावात् ॥ न चैव संध्यावंदनादौ शूद्रस्य मंत्रवर्जमविका

५ त्रः प्रशस्यते॥ चित्रगुप्तस्य वा लातमिति वेदविदो विदुः आग्निं दूतं वृणीमह
इति वन्हेरुदाहृतः उदुत्तममेवरुण इत्यपां मंत्रः प्रकीर्तितः भूमेः पृथिव्यं तरि
क्षमितिवेदेषुपठ्यते॥ सहस्रशीर्षापुरुष इतिविष्णोरुदाहृतः इन्द्रये होमत
त्वत इतीन्द्रस्य शस्यते॥ उत्तानपर्णे सुभगइति देव्याः समारभेत्॥ प्रजा
पतेः पुनर्होमः प्रजापतइति स्मृतः नमोस्तु सर्प्पेभ्य इति सर्प्पाणां मंत्र उच्य
ते॥ एव ब्रह्मा यज्ञानां विय इति ब्रह्मण्युदाहृतः॥ विनायकस्य वाह्नन इतिमं
त्र बुधैस्मृतः जातवेदसे सुनवाम दुर्गा मंत्रो त्र उच्यते॥ आदित्प्रत्नस्य रेत
स आकाशस्य उदाहृतः॥ क्षाणाविष्णुर्म्मा नांतक्षयायोः प्रकीर्तितः एषोउ
षा अपूर्व्यस्य ग्विनो मंत्र उच्यते॥ पूर्णाहुतिं तु मूर्द्धानं दिव इत्यभिपातये
त्॥ अथाभिषेकमंत्रेण वाद्यमंगल गीतकैः यजमानस्य कर्तव्य चतुर्भिस्त्रि
पनं द्विजैः सुरास्त्वामभिषिंचयंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्ना
थः स्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखं
डलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः ब्रह्मणा सहितः शेषो दिक्पालाः पांतु ते सदा॥ कीर्तिर्लक्ष्मीर्धृतिर्मे ५

धाः पुष्टिश्रद्धाक्रियामतिः॥ बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मात
रः एतास्त्वामभिषिंचंतु धर्मपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजी
वसिताऽर्कजाः॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः॥ देवदानवगंध
र्वा यक्षराक्षसपन्नगाः ऋषयो मुनयो गावो देवमातर एव च॥ देवपत्न्यो द्रु
मा नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि
च॥ ॐषधानि च रत्नानि कालस्यावयवाश्च ये॥ सरितः सागराः शैलास्ती
र्थानि जलदा नदाः येन त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥ ततः शुक्लां
बरधरः शुक्लमाल्यानुलेपनः सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः
यजमानः सपत्नीकः सार्त्विजस्तु समाहितः दक्षिणाभिः प्रयत्नेन पूजयेद्
तविस्मयः॥ सूर्याय कपिलां धेनुं शंखं दद्यात्तथेंदवे रक्तं धुरंधुरं दद्या
द्भौमाय कुदाचितं॥ बुधाय जातरूपं तु गुरवे पीतवाससी॥ श्वेताश्वं
दैत्यगुरवे कृष्णां गामर्कसूनवे॥ आयसं राहवे दद्यात्केतुभ्य छागमुत्त
मं॥ सुवर्णेन समा कार्या यजमानेन दक्षिणा॥ सर्वेषामथवा गावो वा दात
व्या हेमभूषिता॥ सुवर्णमथवा दद्याद्गुरुर्वा येन तुष्यति॥ स्वमन्त्रेण प्र

५ दातव्याः सर्वाः सर्वत्र दक्षिणाः कपिला सर्वदेवानां पूजनीयासि रोहिणी ॥
तीर्थदेवमयी यस्मात्ततः शांतिं प्रयच्छ मे ॥ पुण्यस्त्वं शंख पुण्यानां मंगला
नां च मंगलं ॥ विष्णुना विधृतो नित्यमतः शांतिं प्रयच्छ मे ॥ धर्मस्त्वं वृषरू
पेण जगदानंदकारक ॥ अष्टमूर्तेराधिष्ठानमतः पाहि सनातन ॥ हिरण्य
गर्भगर्भस्थ हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ
मे ॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं ॥ प्रदानात्तस्य मे विष्णुरतः
शांतिं प्रयच्छतु ॥ विष्णुस्त्वं मत्स्यरूपेण यस्मादमृतसंभवः चंद्रार्कवाह
नो नित्यमतः शांतिं प्रयच्छ मे ॥ यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा
सर्वपापहरा नित्यमतः शांतिं प्रयच्छ मे ॥ यस्मादायसकर्माणि तवाधीना
नि सर्वदा ॥ लांगलाद्यायुधादीनि तस्माच्छांतिं प्रयच्छ मे ॥ यस्मात्त्वं सर्वय
ज्ञानामंगत्वेन व्यवस्थितः ॥ यानं विभावसोर्नित्यमतः शांतिं प्रयच्छ मे ॥ ग
वामंगेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्तस्माच्छिवं मे स्यादिह लोके पर
त्र च ॥ यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥ शय्या ममाप्यशून्यास्तु
दत्ता जन्मनि जन्मनि ॥ यथा रत्नेषु सर्वेषु सर्वदेवाः प्रतिष्ठिताः तथा रत्नं

नामात्रा साधीमिधेः सप्तकाः सप्तलाविनीः समिधः कल्पयेत्प्राज्ञः सर्वकर्म
सु सर्वदा ॥ देवानामपि सर्वेषामुपांशु परमार्थवित् ॥ स्वेन स्वेनैव मंत्रेण होत
व्याः समीधः पृथक् ॥ होतव्यं च घृताभ्यक्तं चरुभक्ष्यादिकं पुनः मंत्रैर्दशाहु
तीर्हुत्वा होमद्रव्याहुतिभिस्ततः उदङ्मुखो वा कुर्युर्ब्राह्मण मुनिपुंगवाः
दशौति संख्याधिदेवतानां विधया ॥ मंत्रवंतश्च कर्तव्याश्चरवः प्रतिदैवतमु
हुत्वा दानवरु सम्यक्कृत्वा होमं समारभेत् ॥ आकृष्णेनेति सूर्याय होमः का
र्यो द्विजन्मना ॥ आप्यायस्वेति सोमाय मंत्रेण जुहुयात्ततः ॥ अग्निर्मूर्द्धा दिवो
मंत्रमिति भौमाय ॥ कीर्त्तयेत् ॥ अग्ने विवस्वदुषस इति सोमसुताय वै बृहस्प
तेपरि दीया रथेनेति गुरोर्मतः ॥ शुक्रं ते अन्यदिति च शुक्रस्यापि निगद्यते ॥
शनैश्चराय तु पुनः शंनो देवीति होमयेत् ॥ कयानश्चित्र आ भुवदिति राहोस्तु
दापयेत् केतुं कृण्वन्निति ऋचा केतूनामपि शांतये ॥ आ वो राजेति रुद्रस्य
बलिहोमं समारभेत् ॥ आपो हि ष्ठेत्युमायास्तु स्योनेति स्वामिनस्तथा ॥ वि
ष्णो रिदं विष्णुरिति हूमिसेति स्वयंभुवः ॥ इंद्रमिद्देवतातय इंद्राय जुहुयात्त
तः तथा यमस्य चायं गौरिति होमः प्रकीर्तितः कालस्य ब्रह्मजज्ञानमिति मं

तितः गुरुणा जन्मसंस्थेन ततो राज्ञा सुयोधनः। पाण्डवा बुधपीडायां विकर्माणि
नियोजिताः॥ षष्ठेनोष्णेन सौरेण हिरण्याक्षो निपातितः। एवं चान्ये च बलवन्तो ग्रह-
दोषेण पीडिताः॥ तस्मात् पुष्टिकामो वा ग्रहयज्ञं समाचरेत्॥ नवग्रहमखं
कुर्यात् द्विजश्चतुरः शुभान्॥ अथवाप्येकमभ्यर्च्य विधिना ब्राह्मणोत्तम।
जन्मभूगोत्रमग्निश्च वर्णस्थानमुखानि च॥ यो यो यावान् कुरुते शांतिं ग्रहास्त-
नावमानिताः॥ उत्पन्नोऽर्कः कलिंगेषु यमुनायां च चंद्रमाः। अंगारकस्त्ववंत्यां
च मगधायां हिमांशुजः॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनै-
श्चरस्तु सौराष्ट्रे राहुर्वैराटनापुरे। अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः॥
यस्य यस्य च यो हंता तत्तत् तु वक्ष्याम्यतः परं॥ आदित्यः काश्यपो गोत्रो आत्रे-
यश्चंद्रमा भवेत्॥ भारद्वाजो भवेद्भौमः तथात्रेयश्च सोमजः। शाक्रस्त्वां-
गिरो गोत्रः शुक्रो वै भार्गवस्तथा॥ शनिः काश्यप एवाथ राहुः पैठिनसि-
स्तथा॥ केतवो जैमिनीयाश्च ग्रहा गोत्रास्त्वनंतरं॥ आदित्यः कपिलो नाम
पिंगलः सोम उच्यते॥ धूम्रकेतुस्तथा भौमो जाठराग्निर्बुधः स्मृतः। गुरोश्चै-
वाग्निः शिखी नाम शुक्रो भवति हाटकः॥ शनैश्चरो महातेजा राहुकेत्वोर्हुताश-

नः॥ भास्करांगारकौ रक्तौ शुक्लौ शुक्रनिशाचरौ। सोमपुत्रो गुरुश्चैव ता-
वुभौ पीतकौ स्मृतौ॥ कृष्णं शनैश्चरं विद्यात् राहुं चित्रांश्च केतवः। मध्ये तु भा-
स्करं विद्यात् प्राचीन पूर्वदक्षिणे॥ दक्षिणे लोहितं विद्यात् बुधः पूर्वोत्तरेण तु
उत्तरे तु गुरुं विद्यात् पूर्वेण वत्स भार्गवं॥ पश्चिमेन शनिं विद्यात् राहुं दक्षि-
णपश्चिमे॥ पश्चिमोत्तरतः केतुः स्थाप्यो वै शुक्लतंदुलैः॥ अथवा वर्णकैः का-
र्यास्वस्ववर्णैर्विधानतः। शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ
प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः। प्राङ्मुखा ऊर्ध्वदृष्टी उदङ्मु-
खोऽधामदृष्टी प्रत्यङ्मुखाधोदृष्टी॥ दक्षिणतोमुखा दक्षिणदृष्टयः॥ आदि-
त्याभिमुखास्सर्वे तिष्ठेरन्निति माठरिः॥ वर्णरूपगुणैर्युक्ताः ध्यात्वा हस्ताच्चाहयेत्तु ता-
न्॥ वक्ष्ये स्थानानि देवानामीश्वरादि यथाक्रमं॥ सूर्यस्येवोत्तरे रुद्रं भुउमा
सोमस्य दक्षिणे॥ स्कंदमंगारकस्यैव दक्षिणस्यां निवेशयेत्॥ सौम्यस्य प-
श्चिमतो विष्णुं ब्रह्मा जीवस्य पूर्वतः॥ इन्द्रमेवासितान्विद्यात् सप्तास्नेय-
तो यमं॥ शालाप्र्वोत्तरे काकसर्वं भूतभयावहं॥ केतोर्नैऋते दिग्भागे चि-
त्रगुप्तं निधापयेत्॥ उत्तरे स्थानि सूर्याभ्यां गुरुकेत्वोश्च दक्षिणे॥ गणाधि

पंचतिष्ठाप्य सर्वदेवनमस्कृतं ॥ भानुं तु मंडलाकारं सोमं तु चतुरस्रकं ॥ अं
गारकं त्रिकोणं च बुधं बाणाकृतिं तथा ॥ दीर्घचतुरस्रं गुरुं पंचास्रं भार्गवं
तथा ॥ धनुरूपं स्मरं शनिं विद्यान् राहुं सर्पाकृतिं तथा ॥ ध्वजाकारां केतवः
श्वगणेशान्तं सरूपिणां ॥ स्थापयेद्धु कलदुर्लेवित्ये तास्मिन्नपक्षे मंडलाद्या
कारणस्थापनामितिहेमाद्रि ॥ दिवाकरकुजाभ्यां हि दद्याद्रक्तचंदनं ॥ चं
द्रस्य भार्गवे चैव सितवर्णं प्रदापयेत् ॥ कुंकुमेन तु संयुक्तं चंदनं जीवसौम्य
योः ॥ अगुरुं चंदनं दद्यात् कुंकुमं केत्वर्कजेषु च ॥ ग्रहवर्णानि पुष्पाणि गायत्र्या
धूपमाचरेत् ॥ रवेकुंदुरुकं धूपं चंद्रादीनवलघृताक्षताः सौम्ये सर्जरसं चै
व अगुरुं च बुधं स्मृतं ॥ सिल्हकं गुरवे दद्यात् शुक्रे विजाग्निं तथा ॥ गुग्गु
लुं मंदवारे तु लाक्षा राहोश्च केतवे गुडं वेस्त्रतिमंत्रेण दीपं दद्यात्त्वरितः
अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः यजमानमदाक्षिण्यो नास्ति
यज्ञसमो रिपुः ॥ अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च ॥ नित्यं च नियम
स्थस्य सदा सानुग्रहा ग्रहाः ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः
पूजिता पूजयन्त्येते निर्दहन्त्यपमानिताः ग्रहाणामिदमातिथ्यं कुर्वीत

तिं प्रयच्छतु रहदाने तमेसुराः यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम्
दानान्यन्यानि मन्यन्ते भूमिदानाद्भवन्ति हि ॥ एवं संपूजयेद्भक्त्या वित्तशाठ्ये
न वर्जितः वस्त्रकांचनरत्नौघधूपमाल्यानुलेपनैः अनेन विधानायस्तु
ग्रहपूजां समाचरेत् ॥ सर्वान् कामानवाप्नोति अपस्वर्गे महीयते ॥ यस्तु पी
डाकरो नित्यं समस्य वित्तस्य वा ग्रहः मन्तं यत्नेन संपूज्य शेषानप्यर्चयेन्नरः
स्कांदे तु ॥ तमेव पूजयेद्भक्त्या दक्षिणाभिः स्वशक्तितः सुतरां धृष्टकं ॥
सैवायुतहोमो यनवग्रहमखः स्मृतः विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु क
र्मसु ॥ निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च ॥ वश्यकर्माभिचारादि त
थैवोच्चाटनादिकं ॥ नवग्रहमखं कृत्वा ततः काम्यं समारभेत् ॥ अन्यथा फलं
दं पुंसां न काम्यं जायते क्वचित् ॥ तस्मादयुतहोमस्य विधानं तु समाचरेत्
स्कांदे ॥ देवदानवगंधर्वयक्षराक्षसकिन्नराः पाद्यन्ते ग्रहपीडाभिः किं पुन
र्भुवि मानवाः ॥ नलेनैश्वरेण सौदासो नरमांसेनियोजितः ॥ राहुणा पीडि
तो राजा नलो भ्रान्तो महीतले ॥ अंगारकेविरोधेन रामो राज्याद्विवासित
अष्टमेन शशांकेन हिरण्यकाशीर्हतः ॥ रविणा सप्तमस्थेन रावणो विनिपा

मायं लक्षहोममतः शृणु ॥ सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः ॥ पितॄ
णां वल्लभः साक्षात्भुक्तिमुक्तिफलप्रदः ग्रहतारावलं लब्ध्वा कृत्वा ब्राह्म
णवाचनं ॥ गृहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः ॥ रुद्रायतनभूमौ वा चतु
रस्रमुदङ्मुखवान् ॥ द्वाहस्तमथाष्टौ वा हस्तान्कुर्यात्विधानतः ॥ प्रागुत
रप्लवां भूमिं कारयेद्यत्नतो नरः ॥ प्रागुत्तरसमां साध्य प्रदेशाम्मंडपस्य तु ॥ शो
भनं कारयेत्कुंडं यथावल्लक्षणान्वितं ॥ नवग्रहमखे कुंडं हस्तमात्रं प्रशस्य
ते ॥ चतुरस्रं समंतात्तु योनिवक्त्रं समेखलं ॥ चतुरंगुलविस्तारा मेखला ॥ त
दूर्ध्वोच्छ्रिता ॥ प्रागुदक्प्रवणा कार्या सर्वतः समविस्तृता ॥ शांत्यर्थं सर्वलोका
नां नवग्रहमखे स्मृता ॥ मानहीनाधिकं कुंडमनेकभयदं भवेत् ॥ यस्मात्तस्मा
त्सुसंपूर्णं शांतिकुंडं विधीयते ॥ अस्माद्दशांगुणश्ये ग्रे द्वौ नाद्देवस्य पं तमयुत
होमांगविधानं ॥ अतो लक्षहोमे नैकहस्तं कुंडं अस्माद्द्वांगुणः प्रोक्तो ल
क्षहोमः स्वयंभुवा ॥ आकृतीमिस्तथान्नेन दक्षिणाभिस्तथैव च ॥ आहुती
मिरितिन समिधाध्यहुतिग्रहणं वासिष्टसंहितायां मयुतहोमादित्रयपुर
स्कारेण तत्राष्टशतादिसंख्याविधानं ॥ अन्नेनेति ब्राह्मणभोजनेन स
र्थः दिहस्तविस्तृतं तच्चतुर्हस्तायतं पुनः लक्षहोमे भवेत्कुंडं योनिवक्त्रं ९

त्रिमेखलं ॥ वक्त्रकंठः योनिश्च वक्त्रं च त्रिमेखलाश्चाविशंते यस्य सर्थः ॥ तस्य
चोत्तरपूर्वेण वितास्तित्रयसंस्थितं ॥ प्रागुदक्प्रवणं तत्र चतुरस्रं समंत
तः ॥ विष्कंभाद्धोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणा विष्कंभार्धमष्टादशांगुल
निव प्रागुलसंस्थितः निःसंस्थापनाय देवानां वप्रत्रयसमावृतं ॥ द्व्यंगु
लोच्छ्रितो वप्रः प्रथमः समुदाहृतः ॥ अंगुलाद्वयसंयुक्तं वप्रद्वयमथापरि
अंगुलस्य च विस्तारः सर्वेषां कथ्यते बुधैः दशांगुलोच्छ्रिता भित्तिः स्थंडिल
स्यात्तथापरि ॥ तस्मिन्नावाहयेद्देवान्पूर्ववत्कल्पितं बुधैः आदित्याभिमुखाः
सर्वे साधिप्रत्यधिदैवताः ॥ स्थापनीया मुनिश्रेष्ठ नात्तरेण पराङ्मुखाः ॥ गुरु
त्वानधिकं सत्त्वमसंकुलाहुतिमि घृतपसामधनिशरीरस्तुवाहनं परमेष्ठिनः
विषपापहरो नित्यमतः शांतिं प्रयच्छ मे ॥ पूर्ववत्कुंभमामंत्र्य तदूर्ध्वं होमं समारभे
त् ॥ सहस्राणां शतंतु लासमित्संख्याधिकं पुनः ॥ घृतकुंभवसोर्धारां पातये
दनलोपरि ॥ औदुंबरीमधार्जीं च सर्वशाखाविवर्जितां ॥ बाहुमात्रां स्रुवकं
स्यात ततस्तेभ हव्यो परि ॥ घृतधारां तया सम्यगानरूपरिपातयेत् ॥ स्नानं च
यजमानस्य पूर्ववन्मंत्रवाचनं ॥ स्नानमभिषेकां पूर्ववत् सुतास्ते सादिमंत्रैः
दातव्या यजमानेन पूर्वदक्षिणा पृथक् ॥ कामक्रोधविहीनेन अहि ग्म्यः श

४ तच्चेतसा॥ नवग्रहमखे विप्राश्चत्वारो वेदवेदिनः॥ अथवा त्वृत्विजो शान्तो दा
वेवश्क्रातिको विप्रौ कार्यौ वृपुत्त होमे तु न प्रसज्जेत विस्तरे॥ तद्वा चेदथवा वाप्ये
लक्षहोमे तु ऋत्विजः॥ कर्तव्याः शक्तितस्तद्वच्चत्वारो वापि मत्सराः॥ नवग्रहम
खे सर्वे लक्षहोमे दशोत्तरां॥ दद्यात् मुनिश्रेष्ठ भूषणान्यपि शक्तितः॥ शय
नानि सवस्त्राणि हैमानि कटकानि च॥ कर्णांगुल्यपवित्राणि कटसूत्राणि
शक्तिमान्॥ न मेवं पूजयेद्भक्त्या होता चाचार्यथाविधिः॥ एकमप्यर्चयेद्भक्त्या
ब्राह्मणं वेदपारगं॥ दक्षिणाभिः प्रयत्नेन न बहून्त्वल्पवित्तवान्॥ अनन्तवार्यां
मात्रकर्तृकः प्रयोग उक्तः॥ लक्षहोमस्तु कर्तव्यो यदा वित्तं भवेद्बहुः॥ पुत्रार्थी
लभते पुत्रं धनार्थी लभते धनं॥ भार्यार्थी लभते भार्यां कुमारी च शुभं पतिं॥ भ्र
ष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात्॥ यं यं प्रार्थयते कामं स वै भवति
पुष्कलः॥ निःकामः कुरुते यस्तु स परं ब्रह्म गच्छति॥ अथ कोटिहोमविधिर्म
त्स्ये॥ तस्मात् शतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा॥ आहुतिभिः प्रयत्नेन दक्षि
णाभिः फलेन च॥ पूर्ववद्ग्रहदेवानामावाहनाविसर्जने॥ होममन्त्रास्तथा
चोक्ताः स्नानदाने तथैव च॥ तथा मंडपवेदीनां विशेषोयं निबोधमे॥ को
टिहोमे चतुर्हस्तं चतुरस्रं समन्ततः॥ योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेख ४

वलाद्युतिः॥ आरोग्यबलसंपन्नो जीवेच्च शरदां शतं॥ ग्रहप्रतिमालक्षणं
मात्स्ये॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्वरथसंयुक्तो द्विभुज
स्यात् सदा रविः॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतवाहनः॥ गदापाणिर्द्विबाहु
श्च कर्तव्यो वरदः शशी॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः॥ चतुर्भुजो
मेषगमो वरदः स्याद्धरासुतः॥ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः॥ खड्ग
चर्मगदापाणिः सिंहस्थो वरदो बुधः॥ देवदैत्यगुरू तद्वत् पीतश्वेतौ चतुर्भु
जौ॥ दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू॥ इन्द्रनीलद्युतिः शूली वरदो गृध्र
वाहनः॥ बाणबाणासनधरः कर्तव्योर्कसुतः सदा॥ करालवदनः खड्ग
चर्मशूली वरप्रदः॥ नीलसिंहासनस्थश्च राहुश्चात्र प्रशस्यते॥ धूम्रा द्वि
बाहवः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥
सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः॥ स्वाङ्गुलेनोच्छ्रिताः सर्वे शत
मष्टोत्तरं सदा॥ याज्ञवल्क्ये॥ ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णजावु
भौ॥ रजतादयसः सीसात्कांस्यात्कार्या नवग्रहाः॥ ब्रह्मयामले तु तंत्राचु
कारयेत् सानुरजसेन निशाकरं॥ कुजजीवस्त्रीरूपाणि सुवर्णेन तु कारयेद्
दितिविशेषः॥ ॥ अथ लक्षहोमविधिः॥ ॥ मत्स्ये कथितं तु तहो

८८ ति छंदोगपरिशिष्टेपठनं॥ शांतिसूक्तं च तथा शाकुनं कं शुभपौष्टिकं वम
हाराज मुत्तरेणाप्यथर्ववित्॥ पंचभिः सप्तभिर्वापि होमकार्या अपूर्ववित्
दाहृतं सर्वथैरित्यर्थः शाखाप्रश्नपूर्वोक्तापेक्षया॥ स्नानदानेच मंत्रास्यु
स्त एव मुनिसत्तम॥ वसोर्धाराविधानं च लक्षहोम वदिष्यते॥ अनेन वि
धिना यस्तु कोटिहोमं समाचरेत्॥ सर्वान्कामानवाप्नोति ततो विष्णुपदं
व्रजेत्॥ यः पठेच्छृणुयाद्वापि ग्रहयज्ञत्रयं नरः सर्वपापविशुद्धात्मा पदमि
द्रस्य गच्छति॥ अथपदार्था॥ मार्कंडेयः॥ धृ॥ शिरस्नानंतु कुर्वीत दैवं
पित्र्यमथापि वा॥ प्राङ्मुखो दङ्मुखो वापि श्मश्रुकर्म च कारयेत्॥ सएव॥
देवार्चनादिकार्याणि तथा गुर्वभिवादनं कुर्वीत सम्यगाचम्य प्रयत्नोपि
सद्द्विजः व्रद्धमनुः प्राणानायम्य कुर्वीत सर्वकर्माणि संयतः॥ मार्कंडे
सं कल्पविधिवत्कुर्यात्स्नानदानव्रतादिकं॥ तत्राहो गणेशपूजा आदौ वि
नायकपूजा अन्ते च कुलदेवतेति शाखापरिशिष्टात्॥ तत्रोक्ते चाक्रियते कि
चनेतिर्मंत्रलिंगात्॥ ततो नांदीश्राद्ध पुण्याहवाचने॥ गर्भाधानादिसं ८८
स्कारादिविशिष्टा कर्तव्या नु ब्वेपि॥ नहि श्राद्धपुरा कार्यं कर्म दोषवत्तत्त्वा न मि

८

तिकिकांडि स्मरणात्॥ शौनकः पुण्याहवाचनविधिं वक्ष्यामो यथाविधि
प्रयोक्तुः कर्मणा मादावंतेचोदयासि हयो गणेशपूजान्तरत्ववाचारात्॥ छं
दोगपरिशिष्टे॥ कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः॥ पूजनीया प्रयत्ने
न पूजिताः पूजयंति ताः॥ प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु॥ अथ
वाक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैः॥ कुड्यलग्नां वसोर्धारां सप्तवारान्घृतेन
तु॥ कारयेत्सच धारावा नातिनीचा न चोच्छ्रिता॥ आयुष्याणि च शांत्यर्थं
जप्त्वा तत्र समाहितः॥ षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्॥ अत्र स
र्वेष्वपि सर्वत्रानुषज्यते॥ तेन गणेशमातृपूजा वसोर्धारा नांदीश्राद्धानां
सर्वकर्मांगत्वं॥ मातृशब्देन गौर्यादिषु मातरो ब्राह्म्यादि मनुष्यमातर
श्चगृह्यन्ते॥ गतातल्पोभिना निषिद्धानुपितृत्वश्राद्ध कर्मीकः विसमाच
रेत्॥ कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः नामकर्मणि बालानां चू
डाकर्मादिके तथा॥ सीमंतोन्नयने चैव पुत्रादिमुखदर्शने॥ नांदीमुखं
पितृगणं पूजयेत्प्रयतो गृही॥ वामिष्वपि तत्परेनवेदिकं किंचिदाकारी
त्यादिवचनैरुपसंहाराग्रहयज्ञादौ नांदीश्राद्धमिति पाच्य॥ नाष्टकासु

१२ भवेच्छ्राद्धं न श्राद्धमिष्यते ॥ नसोष्यंती जातकर्म प्रोषितागतकर्मस्याति
छंदोगपरिशिष्टस्य वैष्याथ्यापते ॥ ततोभ्युत्विग्वरणं ॥ तेवायुतहोमे च
त्वारो द्वौ वा ॥ नवग्रहमखे विप्राश्चत्वारो वेदवादिनः अथवा ऋत्विजो शां
तोध्यावेक ऋत्विकाविदः ॥ कार्या वायुतहोमे तु न मस्त्रजेन विस्तरः इति मा
त्स्यात् लक्षतु पक्षे ब्रह्माचार्यौ द्वौ चार्त्विजाविति रे मादिः ॥ द्विपक्षे ब्रह्माचार्यो अ
थवाचैकमध्ये वेदविधिना ब्राह्मणसहितः कार्य ॥ लक्षहोमे तु मात्स्यात
दृष्टादशवाष्टौ वा लक्षहोमे प्रिये द्विजः ॥ कर्त्तव्याः शांतिकेतस्मिन् चत्वारो
वाभिमता ॥ आचार्यब्रह्मसहितानान्ये वेयं संख्या ॥ कोटिहोमे तु मात्स्या
एवं द्वादश वा विप्रा [illegible] माध्मानुकल्पने ॥ वासिष्ठसंहितायां तु युतलक्ष
कोटि ॥ होमानुपक्रमस्य षोडश ब्राह्मणानुश्रुतान् एभानृतावैवर्जितान्
तेषां मध्ये श्रेष्ठतममाचार्यं प्रकल्पयेदिति ॥ आचार्यान्नवभ्यश्च ग्रहा
र्चनं फलं तेरस्फक्के नैचाचार्यो एको ब्रह्मा षट् ऋत्विज इति पक्षे छत्र ॥ आस्मिं
पक्षे एकेनाचार्यकर्म कार्यमपरेतमन्वारम्भेरनुपक्रमोपसंहारयोर्विरो
धादित्युक्तं प्रयोगपारिजाते ॥ अयंच पक्षो युतहोमादिरहितनवग्रहम १२

द्व्यंगुलोच्छ्रितां कार्या प्रथमा मेखला बुधैः ॥ त्र्यंगुलोच्छ्रितालद्द्वितीया
परिकीर्त्तिता ॥ उच्छ्रायविस्तराभ्यां च तृतीया चतुरंगुला ॥ चतुरंगुलस्तु
विस्तारः पूर्वयोरपिशस्यते ॥ वितस्तिमात्रा योनिः स्यात् षडष्टांगुलविस्तृ
ता ॥ वितस्तिरष्टकु ऊर्ध्वपरः कूर्मपृष्ठोन्नता मध्ये पार्श्वे रष्टांगुलोच्छ्रिता
गजोष्ठसदृशी तद्वदायत्ताच्छिद्रसंयुता ॥ एतत्सर्वेषु कुंडेषु योनिलक्षण
मिष्यते ॥ मेखलोपरि सर्वत्र जश्व [illegible] भा ॥ वेदी च कोटिहोमेस्या
द्वितस्तीनां चतुष्टयं चतुरस्रा समानत्वस्त्रिभिर्वप्रैः समावृता ॥ वप्रमाणं
पूर्वोक्तं वेदिकायास्तु बोद्धव्य ॥ तथा षोडशहस्तः स्यान्मंडपश्च चतुर्मुख
पूर्वद्वारेषु संस्थाप्य बहृचा वेदपारगाः यजुर्वेदं तथा पश्चिमे तु साम
वेदिना ॥ अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः ॥ अष्टौ तु होमस्सूर्याचेन
न्यासर्वाभरणभूषणे ॥ त्रिसूक्तैश्च मांस्यानुकल्पने ॥ पूर्वकल्पजपवुध ॥
रौद्रं च पावमानं सुमंगलं ॥ पूर्वतो बहृचः शांतिपटमास्तु दक्षुरवः
शाक्तं रौद्रं च सौम्यं च कूष्मांडं शांतिमेव च ॥ पाठयेद्दक्षिणद्वारे यजुर्वेदि
न ऋत्विजः ॥ सुपर्णमथवै राजमानन्य तत्पुष्टसंहिते ॥ ज्येष्ठसाम तथा शां

ततः स्वस्त्ययनं जपेत् ॥ शारदातिलके ॥ अंगसंकोचयन्ततः प्रविशेद्दक्षिणां
घ्रिणा ॥ नैरृत्यसादिदिवा स्त्रीत्रां ब्राह्मणाद्यांश्च समर्च्चयेत् ॥ हेमाद्रौ तु तोरण
पूजोत्तरं वास्तुपूजोक्ता ॥ मंडपं संप्रविश्याथ तोरणादि प्रपूज्य च ॥ वास्तु
यागं ततः कुर्यात्प्रासादे मंडपेथवा ॥ वास्तुपूजनं सहोमकमहोमकं वा ॥ कृप
दद्यात्पापसाम्यै वलीन्नरेहेदिति बलीमात्रोक्तेः ॥ ततस्तुलापुरुषवन्मंड
पपूजा ॥ ततोग्निस्थापनं ॥ तत्रायुतहोमे एकहस्तं कुंडं ॥ लक्षहोमे द्विहस्तं
चतुर्हस्तं वा ॥ कोटिहोमे षोडशहस्तं मात्स्ये तथोक्तेः ॥ कुंडं च मंडपे शान्
भागेतु दीशानवेदीति हेमाद्रिः ॥ तथाच वेदमंडपाद्बहिर्भागे वोपीठ ॥ व
शिष्टसंहितायामयुतादिहोमप्रकृत्य कुंडं तन्मध्यभागे तु कारयेच्चतुरस्र
कं ॥ कुंडस्यैशानभागे तु पूजावेदी प्रकल्पयदिति स्मृतेः ॥ भविष्ये तु कोटिहोम
प्रकृत्य कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षण इत्युक्तं ॥ गोभिलेन तु कुंडस्य
प्रागुदीच्यां वा प्राच्यामुत्तरतो वा चतुरस्रं चतुर्हस्तं कर्तव्यं ग्रहपीठकं ॥ श्री
कामः पूर्वतः कुर्यात्पुष्ट्यर्थं दक्षिणेन तु पश्चाद्विजन्मासिद्ध्यर्थं र्थेचोत्तरेण
तु ॥ ईशान्यां सर्वकामाय आग्नेय्यामभिचारके नैरृत्यां पुत्रलाभाय पुष्ट्यर्थं
वायव्येन विस्फुटकं ॥ स्थंडिलपक्षेपि चेदिशावस्य विशेषोत्राचारादिति पारिजा

तः ॥ कोटिहोमे पश्चिमदक्षिणपार्श्वे निद्वयं कार्यं योनिवक्त्रद्वयोपेतं तद्वयं तु हस्ति
मेखलमिति मात्स्यात् ॥ मेखलापोनिर्वक्त्र चेति द्वयमाहु ॥ अग्निस्थापनं च यजमा
नशाखया यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् ॥ अप्रमाणमृषिकृता
सो धेत्तमसि मज्जतीति पुराणोक्तेः ॥ सांगं कर्म विधाय यजमानं प्रति प्रवृत्तेष्व
अग्निष्वलौकिक ॥ गार्ह्ये मोपासनं कुर्यात्सर्वाधानी तु लौकिके ॥ स्मार्त्तं च
लौकिके कार्यं श्रौतं वैतानिकाग्निषु इति स्मृत्यर्थसारात् ॥ कात्यायनानु
स्मार्तोपि ॥ तदुक्तं नेत्रपाल्ले ॥ गोभिलः गृह्ये आरुह्य चैव होतव्यं यत्र योविहि
तोनलः ॥ तथा ॥ शुभपात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः ॥ तस्याभावे
शरावेण नवेनाभिमुखं च तत्तथा ॥ लक्षहोमे च वन्हिः स्यात् कोटिहोमे
हुताशनः ॥ कर्णादिषु सान्वजनामशांतिकेवरदः सदा ॥ देवीपुराणे भुजोग्र
हविधौ सुप्तिर्लक्षहोमे पराजितः ॥ कोटिहोमे त्रिवो वन्हिः सर्वकामफल
प्रदः ॥ ततो वेद्यां ग्रहस्थापनं ॥ अग्निप्रणयनं कृत्वा तस्यां मावाहयेत्सुरा
निति मात्स्यात् ॥ वशिष्ठसंहितायां ॥ लिखेदष्टदलं पद्मं वेद्यां कोपरि तत्त्वे:
तथा ॥ यथारुचिप्रमाणेन प्रतिमाः कल्पयेत्सुधीः ॥ ग्रहपूजनेव मात्स्या
हवादित्यादिक्रमेणोक्तः बौधायनेन तु रवि भौमशुक्रसोमबुधगुरुसंदादि

१४ क्रमउक्तः आवाहनं च व्याहृतिमात्रेण॥ आवाहयेद्व्याहृतीभिस्तत्रैवाग्नि
कुमारकाविति मात्स्यात्॥ व्याहृत्या चावाहयेत्तु तानिति स्कांदाच्चेति हेमाद्रिः॥ म
हनरते तु आवाहनाद्युपापनं मित्रं॥ अतो व्याहृतिभिरावाह्य तत्तन्मंत्रेण
स्थापनं कार्यमित्युक्तं॥ प्रयोगपारिजाते तु प्रणवत्वादित्तः कृत्वा भूर्भुवः
स्वस्ततः परं चेत्तुर्थ्यानामसंयुक्तं नमस्कारांततयोजितं॥ एवं मंत्रः समाख्या
तो ग्रहपूजाविधायक॥ अनेनावाहनं कुर्यात् दानेनैव वि र्जयेदिति वाम
न वचनाद्ग्रहगायत्र्यापुजनमुक्तं बोधायनेनत्वावाहनवाक्ये पुविन्नो
घ उक्तः किरिटिनं पद्मासनं पद्माकरं पद्मगर्भसमद्युतिं॥ ससोभ्यं ससरज्जु
कलिंगदेशजं काश्यपगोत्रजं विश्वामित्रर्षि त्रिष्टुप्छंदः संरक्तांबररक्ता
भरणभूषितं सुगंधानुलेपनं रक्तध्वजपताकिनं मुकुटकेयूरशोभित
मारूढरथं दिव्यमेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्राविष्टमाधिदेवताग्नि
सहितं प्रत्यधिदेवतेश्वरसहितं रक्तवर्णं मेउत्पूर्वाभिमुखमादित्यमा
वाहयामि॥ किरीटिनं रक्तमाल्यांबरधरं रक्तो भूलगदाधरं चतुर्भुजं मेष
गमनं भवतीदेशजं वासिष्ठगोत्रजं जमदग्न्यर्षि जगती छंदः संरक्तांबरधरं दे
वं रक्ताभरणभूषितं रक्तगंधानुलेपने रक्तछत्रध्वजपताकिनं मुकुटके १४

यूरेपि भवति युक्तं तत्रैव अत्र च धेन्वादिर्न वा ग्रहदक्षिणा न चमूयो देसा
हेमाद्रिरुक्तः कोटिहोमे पद्धिकलकालानुरोधेन समाप्तिः॥ श्रीग्रमिष्टा तत्
विंशति चतुर्विंशति यद्वा त्रिंशत्च ततः षष्टिशतं वाप्नु लिखोवणुयाति कलि
चो भविष्यात्तरे विनि यो जद्विजास्तत्र शालसंख्या ॥ यात्तमः अलाभे
तु बहुनां च यथा लाभे नियोजयेत्॥ न संख्यानियमश्चात्र ब्राह्मणानां
नवोत्तमः॥ न कालनियमश्चैवस्येछ्यापद्व उच्यते॥ जापकाद्वारपाल
श्च सर्वपक्षेषु भिक्षा गतिहेमाद्रिः ततो मधुपर्कैः संपूज्य मधुपर्केण त्र्य
त्विजः कर्म कारयेत्॥ अपूज्य कारयन्कर्म किल्बिषेणैव युज्यत इति
विश्वामित्रोक्तेः पूर्वोक्तमात्स्योक्तेश्च लिंगे वस्त्रयुग्मं तथा प्रदं केयूरं कर्ण
भूषणं॥ अंगुलीभूषणं चैव मणिबंधस्य भूषणं॥ कंठाभरणयुक्तानि प्रारं
भ धर्मकर्मणः॥ पुरोहिताय दत्वाथ ऋत्विग्भ्यश्चापि दापयेत्॥ अप्सरोजल
पात्र॥ मात्स्य॥ यजमानसपत्नीकः पुत्रपौत्रसमन्वितः पश्चिमद्वारमाश्रित्य
प्रविवेशय्यागमंडपं॥ सग्रहं॥ समंततश्च सिद्धार्थकिरणात्साग्निमंत्रतः
प्रतिष्ठा सारे॥ सर्वतः पंचगव्येन प्रोक्षयेद्यागमंडपं॥ आपोहिष्ठात्र्यचेनैव

१५ तंमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताविष्णु
सहितं प्रत्यधिदेवतानारायणसहितं बाणमंडले ईशाभिमुखं सौम्यमावाहया
मि॥ किरीटिनं पीतांबरवर्णं चतुर्भुजं दंडिनं वरदं साक्षसूत्रकमंडलुं सिंधुदेश
जमांगिरसगोत्रजं वाग्मीष्टर्षिमनुष्टुप्छंदसं पीतांबरं पीताभरणभूषितं पीत
गंधानुलेपनं पीतछत्रध्वजरथपताकिनं मुकुटकेयूरशोभितमारुह्य रथं दि
व्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवतेंद्रसहितं प्रत्यधिदेव
ता ब्रह्मसहितं पीतं दीर्घचतुरस्रमंडले उदङ्मुखं गुरुमावाहयामि॥ किरी
टिनं मित्रनीलसमद्युतिं शूलधरं वरदं गृध्रवाहनं सौराष्ट्रदेशजं काश्य
पगोत्रजं जमदग्निं गायत्रीछंदसं कृष्णांबरधरं कृष्णाभरणभूषितं कृष्ण
गंधानुलेपनं कृष्णछत्रध्वजरथपताकिनं मुकुटकेयूरमणिशोभितमा
रुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताप्रजापति
सहितं प्रत्यधिदेवतायमसहितं धनुर्मंडले प्रत्यङ्मुखं शनैश्चरमावाह
यामि॥ किरीटिनं करालवदनं खड्गचर्मशूलगदाधरं सिंहासनं छेप
र्वदेशजं पैठीनसीगोत्रजं मांगिरसर्षिमनुष्टुप्छंदसं कृष्णांबरधरं कृष्णा
भरणभूषितं कृष्णगंधानुलेपनं कृष्णछत्रध्वजरथपताकिनं मुकुटके १५

यूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टम
धिदेवतासर्पसहितं प्रत्यधिदेवतानिरृतिसहितं कृष्णं शूर्पमंडले दक्षिणा
भिमुखं राहुमावाहयामि॥ धूम्रान् द्विबाहून् गदाधरान् विकृताननान् गृ
ध्रवाहनान् मध्यदेशजान् जैमिनिगोत्रान् गौतमर्षिकान् अछंदसान् चि
त्रांबरधरान् चित्राभरणभूषितान् चित्रगंधानुलेपनान् चित्रछत्रध्वजरथपता
किनो मुकुटकेयूरमणिशोभितानारुह्य रथं मेरुं प्रदक्षिणीकुर्वाणान् ग्रहमंडले
प्रविष्टानधिदेवतान्प्रत्यधिदेवताचित्रगुप्तसहितान् ब्रह्मपिंगलान् ध्वजमं
डले दक्षिणाभिमुखान् केतूनावाहयामि॥ मात्स्याद्युक्तावाहनप्रकारस्तु
प्रयोगे दर्शयिष्यते॥ तत्र सोमादयः आदित्याभिमुखाः एव स्थाप्या नासाभिमु
खाः॥ भौमः प्रत्यधिदेवतया गुर्वधिदेवतया च भौमगुर्वोरादित्येन व्यवधाना
पत्तेरिति हेमाद्रिः॥ सूर्यादीनां मंडलाद्या काकरण्यलदुक्तपुजे वाहनपक्ष एतेस
एव॥ मत्स्ये होमेष्वग्निकुंडस्थापनं वेदिः पूर्वस्यामिति मदनरत्ने उत्तरत उपरिमले
ग्रहस्य दक्षिणे पार्श्वे स्थापयेदधिदेवतां॥ ग्रहस्योत्तरपार्श्वे तु न्यसेत्प्रत्यधि
देवतां॥ वसिष्ठसंहितायां॥ शनेः पश्चिमतः स्थाप्यो विनायकमथार्चयेत्॥
तस्य दक्षिणतः स्याद्दुर्गा जातवेदसस्तथा॥ वायुश्च दक्षिणे कोणे दीशं मंत्रेण वा

१५ र्चयेत्॥ दक्षिणे तस्य वा काद्या मार्दिमलस्य वार्चयेत्॥ अश्विनौ दक्षिणे तस्य
कार्यविधोऽयमर्च्चा॥ उत्सले परिमले॥ ततो विनायकं दुर्गां वायुमंबरमश्विनौ॥
आत्मनश्च स्वसाधैर्मंत्रैः प्रागादितैर्यजेत्॥ प्रयोगपारिजाते॥ पश्चा प्राकूल
मारभ्य दत्तामग्रे तु क्रमान्न्यसेत्॥ इंद्रादिक्ले कपालाश्च तत्तन्मंत्रैः प्रपूजयेत्॥ व
सिष्ठसंहितायामपी प्राग्दिक्पूजोक्ता॥ लोकपालक्षेत्रपालादीनां चावाहन
मानिसं॥ द्वात्रिंशादितिमात्स्योक्तेः॥ केवलग्रहमखे त्वधिदेवतादीनामप्यनिसं
या तव नृसार्दितिरत्नुक्तेः॥ कोटिहोमे तु देवतासु विशेषो भविष्ये॥ ब्रह्माणं पूर्व
भागे तु मध्ये देवं जनार्दनं पश्चिमे च तथा रुद्रं स्कंनु मुत्तरतस्तथा॥ स्कंनु स्कंदं॥ त
तो ग्रहान् तु क्तोपचारैः पूजयेत्॥ वसिष्ठः॥ उपचाराणि सर्वेषामपि शुक्लासितैः
सह॥ गंधाभावे शुक्लं गंधपुष्पाभावे सुगंधकं॥ धूपाभावे गुग्गुलुः स्यात्तगव्या
भावे तु मिश्रकं॥ पंचामृतं गवामेव मिश्रकं न कदाचन॥ ततः कलशस्थापनं त
त्र विशेषो वाशिष्ठे॥ पंचत्वक्पल्लवोपेतं तंत्रतो धिसमन्वितं॥ एषामभावे तु
द्रव्यासर्वौषध्यः प्रकीर्तिताः॥ ततश्चाज्यभागांते होमः॥ मार्कंडेये॥ संपूजये
त्ततो वह्निं दद्याच्चैवाहुतीः क्रमात्॥ पृथ्वीचक्रोदये देवी नदि पुराणयोः॥ होमे
भोजने काले च संध्ययोरुभयोरपि॥ अन्यथा चार्चनं पुनरावाहनं न तु सद्

स्फुरमाणि शोभितं मार्कस्य रथं दिव्यं मेरुं प्रदक्षिणी कुर्वाणं ग्रहमंडले प्राचि
ष्टमधिदेवताभूमिसहितं प्रत्यधिदेवतास्कंदसहितं त्रिकोणरक्तमंडले द
क्षिणाभिमुखमंगारकमावाहयामि॥ किरिटिनं श्वेतवर्णं चतुर्भुजं दं
डं वरदमक्षसूत्रकमंडलूकीकटदेशजभार्गवगोत्रजं शौनकर्षिपंक्तिछंदसं
श्वेतांबरधरं श्वेताभरणभूषितं श्वेतगंधानुलेपनं श्वेतध्वजपताकिनं मु
कुटकेयूरशोभितं मारस्य रथं दिव्यं मेरुं प्रदक्षिणी कुर्वाणं ग्रहमंडले प्रातिष्ठ
मधिदेवतेंद्राणीसहितं प्रत्यधिदेवतेंद्रसहितं शुक्रं पंचकोणमंडले प्राङ्मु
खं भार्गवं शुक्रमावाहयामि॥ किरिटिनं श्वेतांबरधरं दंडाक्षश्वेताभरणं ग
दापाणिं द्विभुजं मा भ्रुयभाग मात्रिगोत्रमात्रेयर्षिमनुष्टुप्छंदसं श्वेतांबरा
धरं श्वेताभरणभूषितं श्वेतगंधानुलेपनं श्वेतध्वजपताकिनं मुकुटकेयूर
शोभितं॥ मारस्य रथं दिव्यं मेरुं प्रदक्षिणी कुर्वाणं ग्रहमंडले प्रविष्टमधिदेवता
सहितं प्रत्यधिदेवतोमासहितं सोमं चतुरस्रमंडले प्रसन्नं सोममावाहया
मि॥ किरिटिनं पीतमाल्यांबरधरं पीतवर्णं खड्गगदाचर्मपाणिं सिंहस्थं वरदं मग
धदेशजमात्रिगोत्रजं भारद्वाजर्षिं बृहतिछंदसं पीतांबरधरं पीताभरणभू
षितं पीतगंधानुलेपनं पीतध्वजरथपताकिनं मुकुटकेयूरशोभि

२८ देवयोहितिवासिष्ठेतु ॥ द्विधाश्चैवाधिदेवस्यापंचानां चैवपंचधा ॥ द्विधाःद्वेतिथो
वेत्सर्थः ॥ पंचानां गणेशादीनां पंचधा एकैकेत्सर्थः ॥ पंचपंचेत्यर्थ इति केचित् ॥
ततश्चादिहोमपारिजाते स्कान्दे लोकपालाश्च तत्तन्मन्त्रैः प्रपूजयेत् ॥ तत्र मन्
त्रैर्जपं कुर्यात्ततो होमं समारभेत् ॥ समिल्लघुविशेषो मात्स्ये होतव्या मधुसर्पि
र्भ्यां दध्ना चैव समन्विताः ॥ वासिष्ठे तु हुनेद्राज्यात्स्वामी धर्मस्कन्धके ॥ ततो युता
दिहोमे ॥ वासिष्ठे ॥ ततो व्याहृतिः कुर्यात्तिलहोममयन्ततः ॥ अथायोयुतहोमः
स्याल्लक्षहोमो द्वितीयकः ॥ तृतीयः कोटिहोमः स्यात्त्रिविधो ग्रहयज्ञकः ॥ एक
रात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ॥ द्विगुणं वा त्रिगुणं वा ततो ब्राह्मणभोज
न ॥ समापयेत्तावद्दिनमेव भक्त्या समन्वितः स्वेच्छयायत्तउच्यत इति भविष्यो
त्तरोक्तेः ॥ कालनियमोऽपि मिताद्रिहोमव्यतिरेकेणायुतादिसंख्यापूरणीये
ति हेमाद्रिः ॥ नृसिंहपुराणे ॥ ततो व्याहृतिभिः पश्चाज्जुहुयात्तु तिलादिकं ॥ पा
वत्सर्पत्तेसंख्या लक्षं वा कोटिरेव वा ॥ होमद्रव्यं वदन्त व्रीहीयवतिलाज्यत्तंभ ॥
व्याहृतिभिरयुतादिहोमं चग्रहवेदेवतानां ग्रहयज्ञस्कन्दोक्तेरिति केचित् ॥ पिता
महचरणास्तु जाग्निवायुसूर्यप्रजापतयो देवता इत्याहुः ॥ ॐ भूर्भुवः स्वरिति
तिस्रो व्याहृतयो जपे ॥ आमिश्रं होमाति समिश्रं तु था स्याल्लमास्यत इतिवा २८
क्याध्वरत्समस्ताभिर्होमरतियोगपारिजाते ॥ मदनरत्ने तु ॥ समस्ताभिरेव व्याहृ

तिर्होमाग्निवायुसूर्याश्च देवता इत्युक्तं ॥ अयुतादिहोमे वार्त्विज एव कर्तार इति
कश्चित्तन्न ॥ द्विगद्वयपक्षे आचार्यस्य होमकर्तृत्वात् ॥ कोटिहोमे चाविशेषो भ
विष्ये ॥ पूर्णे पूर्णे सहस्रे तु दद्यात्पूर्णाहुतिं शुभाम् ॥ गोभिलीयो ॥ न मुक्तकेको जु
हुयात् मानेपाति तजानुकः ॥ उत्तानेनैव हस्तेन अंगुष्ठाग्रेण पीडितं ॥ संहतांगुलि
पाणिस्तु वाग्यतो जुहुयाद्धविः ॥ तुलाहृा नवद्वारणलजप ॥ वासिष्ठे ॥ ततो ज
पादिनुजुहुयात्पूर्णाहुतिमथाचरेत् ॥ शौनकः ॥ अयाश्वेसादिमिर्तुत्वा समुद्रा
हूर्मिरित्यृचा ॥ संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥ अथाश्चिंतिश्चरा
स्वः प्रायश्चित्तापलक्षणं ॥ मात्स्ये ॥ पूर्णाहुतिं च मूर्धानं दिव इत्यभिपातयेत् ॥
आग्नेपूर्णाशामूर्धानं दिवमन्त्रेण संक्षेपणं च धारया ॥ दद्यादुच्छाय पूर्णां वै नापवि
स्पकरान्वित ॥ वासिष्ठसंहितायां ॥ मन्त्रेण सयत्नेजानश्रतिपूर्णाहुतीहुनेत् ॥
वसोर्धारायां कुंभमूलेयवमात्रछिद्रं कर्तव्यमित्युक्तं हेमाद्रौ ॥ अयुतहोमे न
वसोर्धारा मात्स्ये लक्षहोमप्रकरणे एव तदाटात् ॥ वासिष्ठसंहितायां ॥ स्वस्ति
कं कल्पयेत्सम्यक्कुण्डस्येशानभागतः ॥ यजमानाभिषेकार्थं तत्र भद्रासनं न्यसे
त् ॥ प्राङ्मुखस्योपविष्टस्य यजमानस्य तत्र च ॥ अभिषेकं ततः कुर्युः ॥ साच्यपी
ठोऽव्याप्तविजः विविधैर्मंगलैर्घोषैः स्तुतमाधजैः तततत स्याभिषिंच

१८ स्यरक्षार्थं बलीमुत्क्षिपेत् ॥ दिग्विदिक्षु विचित्रान्नैर्दीपैर्नाराजपेत्ततः ॥ शुक्ल
माल्याम्बरधरः शुक्लगंधानुलेपनः ॥ ततो मंडलमागत्य ध्यायेदग्निसुतान्न
तान् ॥ प्रत्येकं इति मन्त्रैश्च रुष्या सुष्पाञ्जलिस्ततः ॥ आचार्याभ्यो नवभ्यश्च ग्रहा
र्चनफलं ततः ॥ सामि दाज्ञवर्ण्यानां चर्तिजहोमफलं चयेत् ॥ ब्रह्मणे कुंभपूजा
यां चार्चनस्य फलं चयेत् ॥ गणपक्षेत्रपाकेभ्यो दुर्गाहिव्यागदेवताः तासां ज
यफलं सम्यग्लक्ष्मीयागजस्य पूर्वकं ॥ प्रयोगपारिजाते वामनः ॥ आचार्य
प्रभृतिभ्यश्च ग्रहार्चनफलं ततस्त्यक्त्वा समिदाज्येतिश्लोका पठित्वा
न् ॥ स एव ततस्तेभ्यो यथाशक्ति दातव्या दक्षिणा ततः आचार्यो ध्वजापता
केभ्यो ब्रह्मणेभ्यश्चापि तुष्टये ॥ आज्यतिरीक्ष्य दत्वा च ब्राह्मणान् भोजयेत्ततः ॥
तत्रैवाश्वलायनः ॥ एकमेकाहुतौ विप्रं होम त्वन्ते न भोजयेत् ॥ असामर्थ्ये
ध्यमेश्चापि विप्रमेकं शताहुतौ ॥ सहस्रं स्यहुत्वे चैकजघन्योपि प्रभोजयेत्
तस्याद्यानुमरालो यो दक्षिणां चात्रमेवं च जपैः प्रणामैः स्तोत्रैश्च तोषयद्गुर्
ये हानम्भा विप्यान्ते ॥ ततः समाप्तं यसेतु कारयेत्सुमहोत्सवं शंखतूर्यनि
नादैश्च ब्रह्मघोषरवेण च ॥ ॥ अथ पितामहकृतो युक्ते होमादि प्रयोगः ॥
कर्मसंकल्पगणेशपूजनपुण्याहवाचनमातृकापूजनं नान्दीश्राद्धं च कृत्वा सं १८

कल्पं ॥ हेमाद्रौ देवीपुराणे ॥ गणाधिपनयेद्याग्रमथ्या तु वराहुतिः ॥ अन्यथा
विफलं विप्र भवतीहन संशयः ॥ भविष्ये ॥ प्रणवादिमिश्चनहिंगे ॥ स्वाहाकारां
तयोजितैः जुहुयात्सर्वदेवानां वेधायेद्वोपकल्पिताः अनेककर्तृके होमे प्र
त्याहुतिस्त्यागस्य कर्तुं मन्त्राभ्यां तास वेदेवता उद्दिश्य सर्वद्रव्याणि विद्दिष्टस
कृत्यागः कार्य इति हेमाद्रिः ॥ पारिजाते आश्वालायनः जुहुयात्समित्रान्नेनां
भिर्जुमिर्यथाक्रमं ॥ तत्रैवस्कांदे ॥ अष्टोत्तरं तु साहस्रं शतमष्टाधिकं तथा
अष्टाविंशतिमष्टौ वा एकैकस्य तु होमयेत् ॥ वासिष्टः आदौ तु समिदाज्यैः
पृथगष्टोत्तरशतं ॥ इयं वसंख्या दिविधे पिग्रहमखे प्रधानदेवतानां विशेषपर
त्वे प्रमाणाभावात् ॥ चरौ तु कटुतिपक्षोपि मात्स्ययाज्ञवल्क्याभ्यामुक्तः यत्रोक्तं
मात्स्ये ॥ होतव्यं च घृताक्तं च चरुभक्ष्यादिकं ततः ॥ चरुशब्देनखण्डोदना
दिरुच्यते ॥ तथा च पारिजाते आश्वलायनः ॥ गुडोदनं पायसान्नं संयावक्षी
रषाष्टिकं ॥ दध्योदनं घृतान्नं च चरुसरं मांसचित्रकं ॥ इत्येतानि हवींषि स्युः समि
त्संख्यासमाहुती ॥ भक्ष्यपदेन शष्कुल्यादि दृष्टपूर्ते अधिदेवतादि होमो प्युक्तो
हेमाद्रौ वरुणां चसमिद्वृश्चसर्पिषाचातिलैः क्रमात् ॥ तत्र मंत्रैश्च होतव्याः
क्रमान्नरधिदेवता ॥ अत्र संख्याच्छल्प परित्रि थे पारिजाते प्रधानदशांशेन पार्श्वे

१२ न्नातायनो कलीकांता विन्नांता प्रण वाहिनी ॥ सती सुम नानंद ॥ सुभद्रेति
प्रागाद्यतानवरेखा वत्सरा ॥ हिरण्या सुव्रता लक्ष्मी विभूति विमला प्रियाज
याकाल विन्नो करत्फुरगा यता नंतद्यतामध्ये कोष्ठचतुष्टयमेकीकृत्य
कोणे पुरेखा वलादेवता आवाहयेत् ॥ मध्यमपदचतुष्केतत्पद ब्रह्माणं ॥
पूर्वपदद्वये दक्षिणस्तने अर्यमणं दक्षिणपदद्वये जठरदक्षिणे विवस्वत ॥
पश्चिमपदद्वये जठरवामे मित्र ॥ उदक्पदद्वयं वामस्तने पृथ्वीधरं ॥ आग्नेप
दार्थयोर्दक्षिणहस्ते सावित्र सावित्रौ ॥ नैऋतपदार्थयोर्वणमध्ये योर्वि
बुधाधिपजयो ॥ वायव्यपदार्थयोर्वामहस्ते राजयक्ष्मरुद्रौ ॥ ईशान
पदार्थयोरुरो मुखे आपापवत्सौ ॥ ईशानपदे दक्षिणार्धे शिरसि शिखि
नं ॥ तद्दक्षिण सार्धपदे दक्षिणनेत्रे पर्जन्य ॥ तद्दक्षिणपदद्वये दक्षिणश्रोत्रे
जयंत ॥ तद्दक्षिणपदद्वये दक्षिणांसे कुलीशायुधं तद्दक्षिण पदद्वये दक्षि
णबाहौ सूर्य ॥ तद्दक्षिणपदद्वये दक्षिणबाहौ सत्यं दक्षिण सार्धपदे दक्षि
णपदे भृशं तद्दक्षिणार्धपदार्धे दक्षिणप्रबाहौ आकाशं ॥ तदाग्नेयमर्धे
दक्षिणप्रबाहौ वायु ॥ तत्पश्चिमसार्धपदे दक्षिणमणिबंधे पूषं ॥ तत्पश्चि
मपदद्वये दक्षिणपार्श्वे वितथं ॥ तत्पश्चिम पदद्वये दक्षिणपार्श्वे गृहक्षतं ॥ त १८

त्पश्चिमपदद्वये दक्षिणोरौ यमं ॥ तत्पश्चिमपदद्वये दक्षिण जानौ गंधर्वं ॥ तत्प
श्चिमसार्धपदे दक्षिणे जंघायां भृंगराज ॥ तत्पश्चिमनैऋत्यपदार्धे दक्षिण
स्फिचि भृंग ॥ तदुत्तरार्धपादयोः पितृन ॥ तदुत्तर सार्धपदे वामस्फिचि दौवा
रिकं ॥ तदुत्तर पदद्वये वामजंघायां सुग्रीवं ॥ तदुत्तर पदद्वये वाम जानौ पुष्प
दंतं ॥ तदुत्तरपदद्वये वामोरौ वरुण ॥ तदुत्तर पदद्वये वामपार्श्वे असुरं ॥ तदु
त्तरसार्धपदे वामपार्श्वे शोषं ॥ तदुत्तरे वायव्यपदार्धे वाममणिबंधे पापे ॥ त
त्प्राग्पदार्धे वामबाहौ अहिं ॥ तत्प्राक्पदद्वये वामकूर्परे मुख्य ॥ तत्प्राक्प
दद्वये वामबाहौ भल्लाटकं ॥ तत्प्राक्पदद्वये वाम बाहौ ॥ तदंसे सोमं ॥ प्र
तत्प्राक्पदद्वये वामांसे सर्पं ॥ तत्प्राक्सार्धपदे वामे श्रोत्रे अदितिं ॥ तत्प्रा
गर्धपदे वामनेत्रे दितिं ॥ उत्तरे वास्तोष्पते इति वास्तुमाते मातृविरिं चरकी
विदारी पूतना पापराक्षसी ॥ इति स्कंध अर्यमणं जंभक पिलिपिंछ ॥ त
तः सर्वा संपूज्य मध्ये द्वादशाने कुंभसंस्थाप्य मंडलाग्रेण यसबलीन्दत्वा
याचमानेन राक्षसोग्रे नतिसत्यावरुप वेष्टयेत् ॥ ततः पूर्वस्यामाग्नि मीडे
पुरोहितं मिति सुद्दृढं तोरणमावाध्य संपूज्य तत्र राहु बृहस्पतीसंपूज्य ॥
कुंभं संस्थाप्य ध्रुव पूजयेत् ॥ ततो दक्षिणे इषे त्वेति सुभद्रनारणमा

२० धवाग्रसूर्य्यागारकोणे तत्र सप्तमकलशं संस्थाप्य धरां प्रपूजयेत्॥ मश्विममेजा
याहीति सुकर्मतोरणमावाह्य तत्र श्रुत्कर्णधौम्रस्य कलशं संस्थाप्य तत्र वा
कूपातिं प्रपूजयेत्॥ उत्तरे ग्नोर्दीरितिमुत्तरतोरणमावाह्य सोमकेतुं शानी
अस्य कलशं संस्थाप्य विन्ध्यं प्रपूजयेत्॥ ततः पूर्वद्वारे कलशद्वयं संस्थाप्य त
त्रैरावतं संपूज्य ऋग्वेदः पद्मपत्राक्षो गायत्र्यः सोमदेवतः अत्रिगोत्रस्तु विप्रेन्द्र
त्र्यक्षिकुले मेमखे भवेति द्वारे वेदिनो ऋत्विजो हर्त्ताग्नीमाल्यरतिसंजप्य ध्यात्वा
पूर्वस्मिन् सर्वा प्रसिद्धसाध्यैरभिष्टुतो वज्रधरामरेशः॥ सुवीजमानोप्सरस्ता
तणेन रक्षाधरं नौम्य गवन्नमस्ते भो इन्द्र इहागच्छ स्वाहा श्रुचिशीघ्रान् इति पी
तां पताकां ध्वजं चाच्छेत्य मातारमिति रं संपूज्य ऐरंद्रं सुरपतिः श्वेतो वज्रहस्तो
महाबलः॥ शतयज्ञाधिपो देवो तस्मै नित्यं नमो नमः इति नत्वा माषभक्तवलिं द
त्वा वामेत॥ तत आग्नेयकलशं संस्थाप्य पुण्डरीकमष्टलं च संपूज्याग्निं ध्यात्वा॥ ए
ह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभिजुष्टतेजो वत्ता लोकगणेन सार्धं ममा
ध्वरं पाहि कवे नमस्ते॥ आवाहयाम्यग्निं हूतमिति रक्तां पताकां ध्वजं चारोप्याग्नि
संपूज्य आग्नेयः पुरुषो रक्तः सर्वदेवमयोव्ययः। धूमकेतु रजोध्यक्षस्तस्मै
नित्यं नमो नमः इति नत्वा वलिं समर्प्यार्चयेत्॥ ततो दक्षिणे कलशं संस्थाप्य वा
मनं दिग्गजं संपूज्य पल्लवे दि नाकालिजो कालराक्षेपजुर्वेदस्त्रैष्टुभो विष्णुदेव २०

त्वाचार्य्यब्रह्मर्त्विग्वरणं कुर्य्यात्॥ तत्र मंत्रः॥ आचार्य्यस्तु यथा स्वर्गे शक्रादि
नां बृहस्पतिः॥ तथा त्वं मम यज्ञेऽस्मिन्नाचार्य्यस्त्वं कुरु प्रभो॥ यथा चतुर्मुखो ब्रह्मा
सर्ववेदधरः प्रभुः॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा द्विजपते भव॥ अस्य यानिष्य
तो भवंता पृथिवीं त्वया॥ सुप्रसन्नाः प्रकुर्वन्तु शांतिकं विधिपूर्वकं॥ ततः स
र्वान् मधुपर्केणार्चयेत्॥ ततो यजमानो जलपूर्णकलशहस्तो भद्रं कर्णेभिरिति
मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य यत्र संस्थितं भूतं स्थानमाश्रि
तं सर्वदा॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ अपक्रामंतु भूता
नि पिशाचाः सर्वतो दिशाः॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे इति गौ
रसर्षपान्॥ विकीर्य्य शुची वो हव्या इति त्र्यंचेनापोहिष्ठादिमंत्रैश्च भूमिं प्रो
क्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं जपेत्॥ ततो मंडपपक्ष्म तत्रैर्जत्ये वास्तु
वेदिकायां वेदीशान्नादिकोणवलुष्टो विशां तु भूतदेवनागलोकपालाश्च स
र्वेन॥ अस्मिन् मंडपे वे तिष्ठंतु॥ आयुर्बलकराः सदा इति मंत्रेण चतुरः शंकून्
रोपयित्वा अग्निभ्योप्यथ सर्पेभ्यो ये च तत्समाश्रिताः॥ तेभ्यो वलिं प्रयच्छामि पु
ण्यमोदनमुत्तमं इति नैऋत्यकोणपार्श्वे माषभक्तवलिं दत्वा सुवर्णादिशलाकया

२१ नम इति इति नत्वा बलिं समर्प्य चामेत्॥ ततो वायव्यां कलशं निधाय तत्रोपु
ष्परं तं सिन्दूरार्घ्यं चावाहयेद्वायुं ध्यात्वा एह्येहि यज्ञे मम रक्षणार्थं मृगाधिरू
ढः सह सिद्धसंघैः॥ प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्न
मस्ते इत्यावाहयेद्वायो वायुमिति धूम्रापताकाध्वजं बोधिं स संपूज्य वायुमा
काशगं चैव पवनं गेन हति॥ आवाहयामि यत्तोस्मिन्पूजेयं प्रतिगृह्यतां॥ ज
नाकाशो महोजाश्च यश्चाहृष्टगातिरिर्विभुः॥ तस्मै पूज्याय जगतो वायवे हं नमो
नमो इति नत्वा बलिं दत्वा वामेत्॥ ततउत्तरे कलशं द्वादय संस्थाप्य सार्वभौममृ
गाजं संपूज्य अर्थं वे विष्टरे त्रिजो वदन्नथो अथर्ववेदानुष्टुभो रुद्रदैवतः वैश्र
पाय नं विप्रेन्द्र ऋालि कलं मेम स्वेति भवेतियत्वा ऋग्वेदे वीरिति संपूज्य
सोममगारकं ध्यात्वा एह्येहि यज्ञेश्वर यज्ञ रक्षा विधत्स्व नक्षत्रगणेन सा
र्धं॥ सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते इत्यावाह्य
पश्चेति हरितापताकां ध्वजं बोधिं स संपूज्य सर्वनक्षत्रमध्येषु सोमा रा
जा व्यवस्थितः नमो सोमाय देवाय नक्षत्रपतये नमः इति नत्वा बलिं दत्वा
वामेत्॥ ततः ईशान्यां कलशं निधाय सुमती केम गजच संपूज्य ईशा
नं ध्यात्वा एह्येहि विश्वेश्वर नस्त्रिशूल कपाल खट्वांगधरेण सार्धं लोके २१
न पूतेश्वर यज्ञसिध्ये गृहाण पूजां भगवन्नमस्ते इति आवाहयभिलाप

वसवित रीति श्वेतापताकाच ध्वजं बोधिं स संपूज्य वृषस्कंधसमारूढ श्वे
त कल्लोलि लोचन॥ आवाहयामि यत्तोस्मिन्पूजेयं प्रतिगृह्यतां॥ सर्वाधि
पो महादेव ईशानः शुक्लईश्वरः॥ शूलपाणि विरूपाक्षस्तस्मै नित्यं न
मो नम इति नत्वा बलिं दत्वा चामेत्॥ ततः ईशान पूर्वयोर्मध्ये जनं ध्या
त्वा एह्येहि पाताल धरा मरेन्द्र नागगनाकिन्नरगीयमानाः यक्षोरगे
न्द्रामररोक सपैः न तंस्त्वा ध्वरमस्य हि यामि सा वाह्य श्वेता पताका
ध्वजं बोधिं सायं गौरि ति संपूज्य योसावनंतरूपेण ब्रह्माण्डस चराचर
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः इति नत्वा बलिं दत्वा वामेत्॥ त
त पश्चिम नैरृत्योर्मध्ये ब्रह्माणं ध्यात्वा॥ एह्येहि सर्वाधिपते सुरेन्द्र लोके
न सार्धं पितृदेवताभिः॥ सर्वस्य धातास्यमितप्रभावो विशाधरेनः॥ सन
तं शिवाय ब्रह्मन्जजुतानमिति रक्तापताकाध्वजं बोधिं स संपूज्य॥ पद्मयो
निश्चतुर्मूर्तिर्वेदवासः पितामहः॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो
नम इति नत्वा बलिं दत्वा चामेत्॥ ततो मंडपमध्ये इंद्रस्य दक्षे इति महाध्व
जं संपूज्य तत्र ब्रह्मजज्ञानमिति ब्रह्माणे संपूज्य मंडपस्तम्भेषु सर्वेभ्यो न
मः॥ वेदोपुकिमरेभ्यो नमः॥ पदेपदे नगेभ्यो नम इति संपूज्य पूर्वस्यां कि

२२ किंचिद्भूमिमुपाश्रित्य त्रैलोक्ये यानि भूतानि स्थावराणि-चराणि-चा ब्रह्मावि
ष्णुशिवैः सार्धं रक्षां कुर्वंतु तानि भो देवदानवगंधर्वा यक्षराक्षसपन्नगाः
ऋषयो मनवो गावो देवमातर एव च॥ सर्वे ममाध्वरे रक्षां युकुर्वन्तु मुदान्वि
ताः॥ ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालो गणैः सह॥ रक्षंतु मंडपं सर्वे घ्नंतु र
क्षांसि सर्वतः॥ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः॥ त्रैलोक्यस्थे
भ्यश्चरेभ्यो भूतेभ्यो नमः॥ ब्रह्मणे विष्णवे॥ शिवाय देवेभ्य गंधर्वेभ्यः य
क्षेभ्य॥ राक्षसेभ्यः॥ पन्नगेभ्य ऋषिभ्यः मनुष्येभ्यः॥ देवमातृभ्यो नम
इति संपूज्य बलिं दद्यात्॥ तत आचार्य उपरि मेखलायां श्वेतायामिं द्रवि
ष्णुरिति विष्णुं मध्यमायां रक्तायां ब्रह्मजज्ञानमिति ब्रह्माणं तृतीयां
कृष्णायां कद्रुद्रायेति रुद्रं योन्यां गौरीर्मिमायेति गौरीं च संपूज्याग्निं॥
प्रतिष्ठाप्य ग्रहवेद्यां देवता आवाहयेत्॥ यथा॥ आकृष्णेन हिरण्य
रूपः सविता त्रिष्टुप्॥ सूर्यावाहने विं॰ ॐ भूर्भुवः स्वः कालिंगदेशोद्भ
व काश्यपगोत्र सूर्य इहागच्छ इह तिष्ठ आप्यायस्व गौतमः सोमो गायत्री २२
ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेय सोम॥ अग्निर्मूर्धा विरूपांगारको गायत्री

तः काश्यपपरस्कन्दे प्रेम्णात्रिकूल मे भव स्व भवेति यत्वा इयेत्वेति संपूज्य
नत्वा यसंध्यात्वा॥ एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते॥ शुभा
शुभानंदशुचामधीश शिवाय नः पाहि मखे नमस्ते इत्यावाह्य यमाय गोरि
ति कृष्णां पताकां ध्वजं वा छित्स्य यमाय सोमप्रमिति संपूज्य महोमहिषमारू
ढ दंडहस्तमलबृद्धं॥ आवाहयामि यज्ञेऽस्मिन्पूजयं प्रतिगृह्यतामिति न
त्वा बलिं दत्वा वामत॥ ततो नैर्ऋत्यां कलशं संस्थाप्य तत्र कुसुदुजयेयेचसं
पूज्य निर्ऋतिं ध्यात्वा एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसं
घैः॥ ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते इत्यावाह्य मोद्गु
णरति नीलां पताकां ध्वजं संपूज्य निर्ऋतिं खड्गहस्त च सर्वलोके कृपा
वनं॥ आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रति गृह्यतामिति नत्वा बलिसमर्प्पि
त्वामेत॥ ततः पश्चिमकलशं संस्थाप्यां जमदग्निगातुं संपूज्य सामवेदी नादरेसि
जो सामवेदरूप पिंगाक्षो जागतः शुक्रदेवतः भारद्वाज रूपविभ्यः गालिकृत
मंमखेत वेति वृत्वा भजायाहीति संपूज्य वरुणं ध्यात्वा एह्येहि यादोगणवा
रिधीनां गणेन पर्जन्यसहाप्सरोभिः॥ विद्याधरेन्द्रामरगीयमान पाहि त्वम
स्मान भगवन्नमस्ते इत्यावाह्य मम वरुणे तिश्वेतां पताकां ध्वजं वा प्रियस संपूज्य
पाशहस्तं च वरुण पर्णसापतिमाश्वरं॥ आवाहयामि यज्ञेऽस्मिन्वरुणाय नमो

इंद्रास्त्रिष्टुप् इंद्राणी वृषाकपिरिंद्राणी पङ्क्तिः प्रजापते हिरण्यगर्भः प्र
२३ जापतिस्त्रिष्टुप् आयं गौः सर्पराज्ञी सर्पा गायत्री ब्रह्मजज्ञानं वामदेवो
ब्रह्मा त्रिष्टुप् ततः उत्तरतः गणानां त्वा गृत्समदो गणपतिर्जगती जा
तवेदसे कश्यपो त्रिष्टुप् नववायो व्यश्व आंगिरसो वायुर्गायत्री आदि
त्यस आकाशो गायत्री एषो उषा प्रस्कण्वोऽश्विनौ गायत्री यद्वाराहे स्त
राविनायकः नैरृत्ये वास्तुराहो दक्षिण आकाशं केलो दक्षिणेऽश्विनौ -
ततः उत्तर क्षेत्रस्य वामदेवः क्षेत्रपालोऽनुष्टुप् वातोष्पतिस्त्रिष्टुप् ततो
लक्षकोटिहोमयोः सप्तध्वनिशरीरस्थ वाहनपरमेष्ठिनः विषतापहरानि
त्यमतः शांतिप्रपच्छमेइति मंत्रेण इमिंत्रवरुणमिति वाग रत्नं तमुत्तर आ
वाह्यदिक्पालान्स्वदिक्षु तन्मंत्रैरावाहरवेः पूर्वे शेषसोमाग्रे वासुकिंभौ
माग्रे तक्षकबुधान्तरे कर्कोटकगुरुत्तरे पद्मशुक्रान्तरे महापद्मं शनिपश्चि
मे शंखपालं राहोः पुरः कंबलं केतोः पुरः कुलिकं स्थापयेत् ततः पूर्वे
अश्विन्यादिसप्तनक्षत्राणि विष्कंभादिसप्तयोगान् बवं च बालवकरणे
सप्तद्वीपानि ऋग्वेदं वक्षः दक्षिणे पुष्यादिसप्तनक्षत्राणि धृत्यादिस २३

सप्तयोगान् कौलवतैतिलकरणे सप्तसागरान् यजुर्वेदं च पश्चिमे स्वात्या
दिसप्तनक्षत्राणि वज्रादिसप्तनक्षत्राणि योगान् गरवाणिजे करणे सप्त
पातालानि सामवेदं च उत्तरे अभिजिदादिसप्तनक्षत्राणि साध्यादिसप्तयोगा
न् विष्टिकरणं भूरादीन् सप्तलोकान् अथर्ववेदं च सप्तवायव्यध्रुवा
सप्तपीश्च ततो यथावकाशं गंगादिसप्तसरित सप्तकुलाचलान् अष्टौ
वसून् द्वादशादित्यान् एकादशरुद्रान् एकोनपंचाशन्मरुतान् षोड
शमातृः षड्ऋतून् द्वादशमासान् द्वे अयने पंचदशतिथीः षष्टिसंव
त्सरान् सुपर्णान् नागान् सर्पान् यक्षान् गंधर्वान् विद्याधरान् अप्सरसः
रक्षांसि भूतानि मनुष्यान् इति कोटिहोमे तु वेदेः पूर्वे ब्रह्मा धर्मध्वजनादि
नः पश्चिमे रुद्रः उत्तरे स्कंदः तदस्त्रं गृहं वेद्यां वा ह्य पुरुषसूक्तेन षोडशो
पचारैः संपूज्य प्रार्थयेत् आदित्या वसवो रुद्रा मरुतो लोकपालास्तथा
ब्रह्मा जनार्दनश्चैव शूलपाणिर्भगो क्षता अत्र संनिहिताः सर्वे भवंतु मख
भागिनः पूजां गृह्णंतु सर्वत्र मया भक्त्योपपादितां कुर्वंतु च शुभं सर्वे यज्ञ
कर्तुः समीहितां इति ततो वेदिशान्यां कुंभं संस्थाप्य वरुणं संपूज्य देवतानव

सर्वादेवति संप्राथ्य चाधानं कुर्यात् चक्षुषी आज्येने संतुसुक्त नवग्रहान
२८ षडष्टाविंशत्सष्टान्यतमसंख्याभिः समिच्चर्वाज्याहुतिभिरधिदेवताप्रत्य
प्रधान देवान् नाह्निमापि वा समिच्चर्वाज्याहुतिभिः नवग्रहानयुतलक्षको
ट्यन्यतरसंख्याभिर्यवव्रीहीघृततिलान्यतराहुतिभिः शेषेणस्विष्टकृत
मित्यादि चर्वाज्याहुतीरेकैव सर्वेषामिति पक्षे तथाह्येवः लक्षकोटिहो
मयागे रत्नं तमष्टहस्तादिसंख्यया समिदाहुतिभिः कोटिहोमे ब्राह्मणादीनां गर्भ
उदलं चर्वेकाहुतिपक्षे न वस्थाली दामधर्मश्च लक्षहोमादेर्बहुदिनेसा
ध्यत्वे चरुस्विष्टकृद्भ्यादिनं एव कार्यः यावद्धोमप्रतिदिनं ग्रहपूजा कार्या
कोटिहोमे प्रति सहस्रं पूर्णाहुतिरिति होम समाप्तौ चाग्निसंपूजास्विष्टकृदा
दिप्रायश्चित्तहोमां तेन हुत्वा भोः समेनादिग्भ्यो लोभ्यो वेदे समता नवग्रहेभ्यो
वेदे रुत्तरतो विनायकादिस्सभ्यो गरुत्मते च तत्तन्नाम्ने माषभक्त बलिं दत्त
क्षेत्रपाल बलीं दुर्बाहस्त्रेणन भद्रेण वा चतुष्पथ क्षेपयेत् ततः प्रक्षाल्ये
तपादो धारयाग्रहीतेन वतुरत्ली तेन वीसवस्त्रं नालिकेरादिस्यतेनपूर्णा
हुतिं कुर्यात् तत्र मंत्राः समुद्रा दूर्मिरिति त्वच स्य गोम तमो वामदेवोग्निस्त्रि २८
ष्टुप् मूर्धानं दिवो वार्ते स्यसोपसरदा जो वैश्वानरास्त्रिष्टुप् पुनस्त्वाग्निर्व

ॐ भूरवतोसमुद्भवभारद्वाजसगोत्रभौम उद्बुध्यध्वं बुधः सौम्योबुध
स्त्रिष्टुप् ॐ भूर्मगधदेशोद्भव आत्रेयसगोत्रबुध बृहस्पतेऽग्त्स मबोबृ
हस्पतिस्त्रिष्टुप् ॐ भूः सिंधुदेशोद्भव आंगिरससगोत्रबृहस्पते शुक्रः पा
राशरः शुक्रोद्विपदाविराट् ॐ भोजकटदेशोद्भवभार्गवसगोत्रशुक्र शा
माग्निरिरिपिटिः शनिरुष्णिक् ओं भूः सौराष्ट्रदेशोद्भवकाश्यपगोत्रशनै
श्चर कया नो वामदेवोराहुर्गायत्री ॐ भूराटीनापुरोद्भव पैठिनासिस
गोत्रराहो केतुं मधुच्छेदाः केतवो गायत्री ॐ भूअंतर्वेदासमुद्भवजैमि
निसगोत्रकेतो अथादिदेवा त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् गौरिर्मिमाय
दीर्घतमा उमाजगती यदक्रंदो दीर्घतमास्कंदस्त्रिष्टुप् विष्णोर्दीर्घतमा
विष्णुस्त्रिष्टुप् ब्रह्मजज्ञानं वामदेवो ब्रह्मात्रिष्टुप् इंद्रं वो मधुच्छंदा इंद्रो
गायत्री यमाय सोमायमोपमोनुष्टुप् मोषुणः कण्वकालो गायत्री उ
पोवाजप्रकण्वश्चित्रगुप्तायन्त्री अथप्रत्यधिदेवाः अग्निंकाण्वो मेधा
तिथिरग्निर्गायत्री अप्सुमेमेधातिथिरापोनुष्टुप् स्योना मेधातिथि
र्भूमिर्गायत्री इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री इंद्रश्रेष्ठानिग्त्समग

नकरभटकृतेशांतिसारेलक्षहोमादिपद्धतिः अथकोटिहोमशतमु
२५ खादिभेदा हेमाद्रौभविष्योत्तरे शताननोदशमुखोद्विमुखैक
मुखस्तथा चतुर्विधोमहाराजकोटिहोमोविधीयते कृत्वाकुंडशतं
दिव्यंयथोक्तंहस्तसंमितं एकैकस्मिंस्ततःकुंडेदशविप्रान्नियोजयेत्
पंचखातनशणीतत्रोसर्वतःपरिमाविते होमंकुर्युर्द्विजाःसर्वेकुंडेकुंडे
यथोदितं अत्रसर्वेतिकर्तव्यताप्रपूर्ववत् कुंडानांहस्तमात्रतापता
द्विशीघ्रग्राहिद्रव्यविषयातिलयवाहोतु अयुतेलक्षहोतव्येकुंडस्याद्ध
स्तमात्रकंद्विगुणलक्षहोमेचतुर्गुणामितिवाक्यात् लक्षार्धेत्रिकुंडकं
उलक्षहोमेचतुःकरमितिअविरोधाव तथान्याचार्यानैऋत्यंकुंडेग्नि
प्रतिष्ठापयेत् ततस्तमग्निमन्येषुऋत्विजःप्रणयेयुःपृथगाघारादिक
रंतिकृत्वावाद्धव्य अथाहुतिमाणमितिकात्यायनोक्तेः अत्रचस
हस्रंब्राह्मणसंख्याऋत्विग्विषया इतिशतमुखः यद्वाहदशमुखःकार्य
कोटिहोमोमहामतविप्राणांद्विशतीतत्रसुविस्तजनियोजयेत् अत्रचै
कस्मिनकुंडेदशलक्षहोमऋत्विजांविशतिश्च कुंडपंचकंप्रोक्तंशताल २५
क्षायुतोक्रमात् इतितंत्रोतरोक्तेः शेषंपूर्ववत् इतिदशमुखः अथके

उदर्पकृत्वाविभज्यचाविभावसुं होमंकुर्युर्द्विजश्रेष्ठाःसहस्रविधिपूर्व
केशतंतत्रनियोज्यंस्यात्द्विप्राणांप्रविभज्यवै यद्वामासेवाकार्यं कालं
उपस्थिते तदर्धंतुद्विमुखःकार्यःकोटिहोमोविचक्षणैः अत्रयंवात्र
द्वत्विजःप्रतिकुंड अन्यल्लाग्वत् इतिद्विमुख अत्रमंडपेविशेषोभावि
ष्योत्तरे उत्तमशतहस्तंतुतदर्धेनतुमध्यमं जघन्यंतुतदर्धेनशक्ति
कालाद्यपेक्षया शतमुखेशतहस्तदशमुखेमवाढस्तः द्विमुखे
पंचाविंतिहस्त २ तहस्त ५ मंडपेदशहस्तानशतकोष्टकान्कृत्वा त
न्मध्येशतद्विहस्तानिकुंडानिकुर्यात् एवपरासुखद्विमुखयोरपीति
अथादित्यशांति मदनरत्ने भविष्योत्तरे आदित्यवारहस्तेनपूर्वंग्रहवि
चक्षण मंत्रोक्तविधिनासर्वंकुर्यात्कजादिकंरवे प्रत्येकंसप्तनक्तानि
कृत्वाभक्तिपरोऽनरः ततस्तुसप्तमेमासेकुर्याद्ब्राह्मणभोजनं भास्क
रस्तुद्दिसौवर्णंकृत्वायभेनमानवः ताम्रपात्रेस्थापयित्वारक्तपुष्पैःपूज
येत् रक्तवस्त्रयुगच्छत्रोपानद्युगोन्वितं घृतेनस्नापयित्वाचलड्डु
कानिनिवेद्यच होमंघृततिलैःकुर्यात्द्विनाम्नाचमंत्रवित् साग

धोष्टौत्तरशतमष्टाविंशतिरेव च होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृते
२६ न च समिधोर्कसमिधः मंत्रेणानेन विदुषे ब्राह्मणाय प्रदापयेत् आदि
देव नमस्तुभ्यं सप्तसप्ते दिवाकर त्वं रवे तारयस्वास्मान् संसारभवसाग
रात् सूर्यपीडासु घोरासु कृता शांतिः शुभप्रदः इत्यादित्यशांतिः अथ
चंद्रशांति तत्रैव नक्षत्रे त्रासु संगत्य सोमवारे विचक्षणः अनेनैवोक्त
विधिना कुर्यात्पूजादिकविधाः सप्तमन्तु ततः प्राप्ते कुर्याद्ब्राह्मणभो
जनं सप्तमे नक्के कांस्यपात्रेथ संस्थाप्य सोमं रजतसंभवं श्वेतवस्त्र
युगच्छन्नं श्वेतपुष्पैः प्रपूजितं पादुकोपानहौ छत्रं भोजनासनसंयु
तं होमघृततिलैः कुर्यात्सोमनाम्नाथ मंत्रवित् समिधोष्टोत्तरशत
मष्टाविंशतिरेव वा होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च समिधः
पालाशस्य दध्यन्नाद्री खरं कृत्वा ब्राह्मणाय निवेदयेत् कृत्वा सोमं ध्यत्व
सर्थः मंत्रेणानेन राजेंद्र सम्यग्भक्त्या समन्वितः महादेवजा नवल्लीपु
ष्पगोक्षीरपांडुरं सोम सौम्यो भवास्माकं सर्वदा ते नमो नमः एवं कृ
ते महासौम्यो भवस्माकं सर्वदा ते नमो नमः एवं कृते महासौम्य सोपस्कृ २६
ष्टिकरो भवेत् इति चंद्रशांतिः अथांगारकशांतिः तत्रैव स्वाद्यामं

रुद्रादि त्यास्त्रिष्टुप् पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप् सप्त ते अग्ने स
मिधा नाग्निर्जगती धामत्ते वामदेव आपो जगती इदमग्नये वैश्वानराय वसुरु
द्रादित्येभ्यः शतक्रतवे सप्तवते अग्नये अद्भ्यश्च नमस्तोति त्यागः अथ वसोर्धारापा
तयेत् तन्मंत्रः औं अग्निमीळे इतिन्नचानां मधुच्छंदा अग्निर्गायत्री वीर्षी नुक
मितिषण्णां दीर्घतमा विष्णुस्त्रिष्टुप् आ नष्पितरग्निष्वदात्ता नागत्स्तु महो रु
द्रस्त्रिष्टुप् स्वादिष्टयेतिद्वयानां मधुच्छंदाः पवमानसोमो गायत्री महावै
श्वानरमेष्टे साय निच पूर्णपात्रविमोकादिकर्मशेषं समाप्य सार्द्धिकं स्नुव
संपादनं कृत्वा कुंडस्थानभागे स्वस्तिकोपरि भद्रासनस्थितं यजमाने गृहे श्रा
द्धेकेन समुद्रज्येष्ठा इत्यादिभिः सुरास्त्वामभिषिंचंतु मिश्राभिषिंचेत् अत्र पत्नी वामे
ततो यजमानः सर्वौषधीभिरनुलिप्य स्नात्वा धेन्वादि दक्षिणा पूर्वोक्तमंत्रे द
द्यात् ये अयुतहोमे एकैकं लक्षहोमे दश दश कोटिहोमे शतं शतं स्व
र्णमस्त वसुवर्णेन समकर्तव्य मुख्याभावसुवर्णं दद्यात् ततो द्वारजापके
भ्योन्येभ्यश्च यथाशक्ति दक्षिणां दत्वा पूर्वस्थापितदेवताः संपूज्याचार्याय
दत्वाग्निं संपूज्य विभूतिं धृत्वा गच्छ गच्छेत्यग्निं विसृज्य ब्राह्मणान्संभोज्य कर्म स
माप्य वाचयित्वा कर्मेश्वरार्पणं कृत्वा नत्वा श्रुत्वा कारयेत् इतिग्रि

चन्दनं शंखवन्यस्तानि दत्वानं च चन्द्रदोषविनाशनं खदिरं देवदारुं चातितिला
न्यातिलान्यामलकानि च पूर्णकुंभे फलेरोप्ये भौमपीडाविनाशनं नदीसं
२९ गमतीर्थानि तन्महासति तानि च न्यस्तानि कुंभपात्रे हैमे बुधपीडाविनाश
